Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 3 | ISSN : 2581- 6306

# श्रीमद्भागवतपुराणे धर्मस्य स्वरूपम्

**आचार्य (डॉ.) बृहस्पतिमिश्रः**

सहाचार्यः, संस्कृतपालिप्राकृतविभागः हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला,काङ्गड़ा (हि.प्र.)

**Article Info**

Volume 4, Issue 3

Page Number : 208-213

**Publication Issue :**

May-June-2021

**Article History**

Accepted : 01 June 2021

Published : 15 June 2021

**शोधालेखस्य सारः** –धर्मस्य अपरिहार्यतां दृष्ट्वा भारतीयाः मनीषिणः वैदिककालतः एव धर्मं, तस्य तत्त्वं च चिन्तयन्तः सन्ति।धर्मः पापं नाशयति। सर्वं धर्मे प्रतिष्ठितम्। अतः विद्वांसः धर्मं मोक्षस्य उत्तमं साधनं मन्यन्ते।लक्ष्मीः चलायमाना अस्ति, जीवनम् अपि चलायमानम् अस्ति। अस्मिन् चराचरे जगति केवलं धर्मः एव अचलः।मानव-जीवनस्य विशिष्टम् उद्देश्यम् अस्ति तच्च सर्वं धर्मणि निहितम् अस्ति।वेदेषु यत् कर्म कथितं सः धर्मः, तथा अस्य विपरीतं वेदेभ्यः प्रतिकूलं यत् कर्म स अधर्मः उच्यते। मनुष्याय धर्मस्य सिद्धिः सा एव यत्र भगवतः प्रसन्नता भवेत्।[i]धर्मस्य फलं मोक्षः। अन्यस्मिन् अर्थे धर्मस्य सार्थकता नास्ति। श्रीमद्भागवते धर्मस्य सामान्यः, असाधारणः, विशिष्टः, आपदः एतानि चत्वारि रूपाणि वर्णितानि सन्ति।श्रीमद्भागवतानुसारं यः मनुष्यः धर्मं न पालयिष्यति तस्य अमङ्गलम् एव भविष्यति।

**मुख्याः शब्दाः** - धर्मः, वैदिककालः, भारतीयसंस्कृतिः, भारतीयज्ञानपरम्परा, अभ्युदयः, निःश्रेयस्सिद्धिः, धारणात्मकतत्त्वम्, पुराणानि, श्रीमद्भागवतपुराणम्, भगवति भक्तिः, चत्वारः वर्णाः, चत्वारः आश्रमाः, आपद्धर्मः, आनन्दमयः।

धर्मः भारतीयसंस्कृतेः अभिन्नम् अङ्गम् अस्ति। भारतीयायाः संस्कृतेः मर्यादां चेतनां च यः रक्षति सः धर्मः विशिष्टं तत्त्वम्, सःधर्मः भारतीयसंस्कृत्यै जीवनशक्तिं प्रयच्छन् अक्षुण्णं करोति। धर्मस्य अपरिहार्यतां दृष्ट्वा भारतीयाः मनीषिणः वैदिककालतः एव धर्मं, तस्य तत्त्वं च चिन्तयन्तः सन्ति। वेदेषु धर्मस्य चिन्तनम् अतीवविशिष्टरूपेण भवति यतो हि वेदोऽखिलोधर्ममूलम् इति चोक्तम्[ii]।

धर्मशब्दस्य प्रथमोल्लेखः ऋग्वेदे दृश्यते।[iii]अथर्ववेदेऽपि धर्म-शब्दस्य प्रयोगःप्राप्यते।[iv]तैत्तिरीयारण्यके ऋषिः धर्मस्य वैशिष्ट्यं प्रतिपादयन् धर्मः एव समग्रं जगत् प्रतिष्ठापयति स्थिरीकरोति इति उल्लिखितम्।लोके धर्मस्य विषये एव प्रवृत्तिः भवतु इति दृष्ट्या प्रजाः धर्मम्अधर्मं च निर्धारयन्ति। धर्मः पापं नाशयति। सर्वं धर्मे प्रतिष्ठितम्। अतः विद्वांसः धर्मं मोक्षस्य उत्तमं साधनं मन्यन्ते-

धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजाः उपसर्पन्ति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

धर्मेण पापमपनुदन्ति, धर्मे सर्वं प्रतिष्ठितं तस्मात् धर्मं परमं वदन्ति।।[v]

भारतीयदर्शनपरम्परासु अपि धर्मस्य स्वरूपं तस्य विशिष्टानि अङ्गानि च प्रकाशितानि सन्ति। मीमांसादर्शने धर्मस्य तात्पर्यबोधका: वेदा: धर्मप्रतिपादका: उक्ता: -चोदनालक्षणोऽर्थो धर्म:'[vi]। एतस्य व्याख्यायाम् अर्थसंग्रहे लौगाक्षिभास्कर: कथयति - न च 'चोदनालक्षणोऽर्थो धर्म'[vii] इति सौत्रतल्लक्षणविरोध:, चोदनापदस्य विधिरूपवेदैकदेशपरत्वादिति वाच्यम्।तत्रापि चोदनाशब्दस्य वेदमात्रपरत्वात्।वेदस्य सर्वस्य धर्मतात्पर्यवत्त्वेन धर्म प्रतिपादकत्वात्।।[viii]तत्रैव अर्थसंग्रहे लौगाक्षिभास्कर: धर्मस्य लक्षणसन्दर्भे प्रतिपादयति यद् यागादिकर्म एव धर्म:यच्च वेदप्रतिपाद्य: भवेत्,वेदप्रयोजनवान् भवेत्, वेदार्थ: भवेत्। स एव धर्म: कथ्यते।[ix]

वैशेषिकदर्शनेयेन लोके अभ्युदय: पारलौकिकं च कल्याणं भवति स: धर्म:। महर्षिकणादस्य मतेनयेन इहलोकपरलोकयो: द्वयोरपि स्थानयो: सुखप्राप्ति: भवेत् तदेव धर्म:। प्राणिनाम् अभ्युदयार्थं कल्याणार्थं च धर्मस्य अस्तित्वं मन्यमान:महर्षि: उक्तवान्- यतोऽभ्युदय नि:श्रेयस्सिद्धि: स: धर्म:[x]।

वेदानां पश्चाद् धर्मस्य सर्वाधिकं विवेचनं स्मृतिषु लभ्यते।मनुस्मृतौ धर्मस्य-धृति:, क्षमा, अस्तेयम्, शौचम्, इन्द्रियनिग्रह: बुद्धि:, विद्या, सत्यम्, अक्रोध: इत्येतानि दशाङ्गानि उक्तानि सन्ति।[xi]मनुस्मृतौ एव धर्मस्य महत्ताया: प्रतिपादक: उल्लेख: प्राप्यते धर्म: एव एकमात्रं मित्रम् अस्ति, यच्च मरणानन्तरमपि सार्धं गच्छति अन्यत् सर्वं तु शरीरेण सह नष्टं भवति -

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति य:।
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति।।[xii]

मनुस्मृत्यनुसारं सदाचार: सर्वप्रथम: धर्म: स्वीकृत:।[xiii]महाभारतानुसारं धारणात्मकतत्त्वस्य रूपेण धर्मस्य व्याख्या कृता – प्रजा: यस्य धारणं कुर्वन्ति स: धर्म:।[xiv]

पद्मपुराणे महर्षिव्यासस्य कथनम् अस्ति यद् धर्मस्य सारं शृण्वन्तु धारयन्तु च - यत् स्वात्मने न रोचते तद् अपरै: सह न व्यवहरन्तु।[xv] देवीभागवते कथनम् अस्ति -

आत्मैव न सहायार्थं पिता माता च तिष्ठति।
न पुत्र दारा न ज्ञाति: धर्मस्तिष्ठति केवलम्।।[xvi]

अर्थात् परलोके न माता, न पिता, न पुत्र:, न स्त्री: न च सम्बन्धिन: सहायका: भवन्ति। केवलं धर्म: एव सहायक: भवति। चाणक्यनीतौ उक्तम् - लक्ष्मी: चलायमाना अस्ति, जीवनम् अपि चलायमानम् अस्ति। अस्मिन्  चराचरे जगति केवलं धर्म: एव अचल:।[xvii]

वास्तविकतायां धर्म एव जीवनस्य सार: अस्ति। आहारनिद्रादिकर्माणि सम्पाद्यपशु: अपि स्वजीवनयापनं करेति।किन्तु मानव-जीवनं केवलम्आहारनिद्राभयमैथुनं एतावदेव न। मानव-जीवनस्य विशिष्टम् उद्देश्यम् अस्ति तच्च सर्वं धर्मणि निहितम् अस्ति।[xviii]

श्रीमद्भागवतपुराणस्यसंस्कृतसाहित्यस्य धर्मप्रतिपादकेषु ग्रन्थेषु महत्त्वपूर्णं स्थानम् अस्ति। अस्मिन् पुराणे श्रीकृष्णद्वैपायनवेदव्यासः धर्मं व्याकुर्वन् तस्य त्रिंशत् लक्षणानि इति कथयति। एतानि त्रिंशत् लक्षणानि–सत्यम्, दया, तपस्या, शौचम्, तितिक्षा, औचित्यम्, अनौचित्यविचारः, मनसः संयमः, इन्द्रियनिग्रहः, अहिंसा, ब्रह्मचर्यम्, त्यागः, स्वाध्यायः, सरलता, सन्तोषः समदर्शिभावः, महात्मनां सेवा, सांसारिकभागेभ्यः निवृत्तिः, मनुष्याणाम् अभिमानपूर्णप्रयत्नानां प्रतिफलम्, मौनम्, आत्मचिन्तनम्, प्राणिभ्यःअन्नादीनां यथायोग्यं विभाजनं मनुष्येषु आत्मनः इष्टदेवस्य च भावः, श्रीकृष्णस्य नामलीला, गुणानां श्रवणम्, कीर्तनम्, स्मरणम्, पूजा तथा तस्य दासत्वम्, सख्यं, आत्मसमर्पणम् एतानि त्रिंशत् आचरणानि सर्वेषां मनुष्याणां कृते परमोधर्मोऽस्ति।[xix]

अन्यत्र धर्मस्वरूपम् एवं प्रतिपादितम्– वेदेषु यत् कर्म कथितं सः धर्मः, तथा अस्य विपरीतं वेदेभ्यः प्रतिकूलं यत् कर्म स अधर्मः उच्यते।[xx] वेदः भगवत्स्वरूपः तथा तस्य भगवतः स्वाभाविकः श्वास– प्रश्वासः स्वयं प्रकाशः ज्ञानमस्ति। अत एव वेदः सर्वेषां पदार्थानां गुणनामरूपकर्मादिभिः विभाजनं करोति।धर्मस्य मर्यादां व्याकुर्वन् श्रीमद्भागवतः कथयति – अस्मिन् संसारे सामान्याः जनाः अज्ञानिनः सर्वे धर्मम् अधर्मं न चिन्तयन्ति।[xxi]परं यदि विचार्येत चेत् धर्माधर्मयोः मर्यादा भगवतः एव निर्मिता।

श्रीमद्भागवतपुराणे धर्मशब्द की व्याख्या बहुषु अर्थेषु समुपलब्धा। एकत्र भगवति अहेतुकी भक्तिरेव परमो धर्मः व्यवस्थापितः –

स वै पुंसां परो धर्मो यतो भक्तिरघोक्षसे।
अहैतुक्यप्रतिहता ययात्मा संप्रसीदति।[xxii]
धर्ममूलं हि भगवान्सर्ववेदमयो हरिः।
स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति।।[xxiii]

अर्थात् यस्माद् अधोक्षजे भगवति भक्तिः भवेत् सः परमो धर्मः।धर्मस्य सम्यग् अनुष्ठानेन यदि मनुष्यस्य हृदये भगवतः लीलाकथादिषु रतिः नोत्पद्यते चेत् सर्वं किमपि व्यर्थस्य श्रमः एव अस्ति।[xxiv]मनुष्याय धर्मस्य सिद्धिः सा एव यत्र भगवतः प्रसन्नता भवेत्।[xxv]धर्मस्य फलं मोक्षः। अन्यस्मिन् अर्थे धर्मस्य सार्थकता नास्ति। भोग–विलासः तस्य फलं नास्ति।[xxvi]तं न तु ऋषयः जानन्ति न देवाः न सिद्धगणाः। अस्यां स्थितौ मनुष्याः विद्याधराः चारणाः असुराः राक्षसाः तु कथम् एव ज्ञास्यन्ति।[xxvii]यः मनुष्यः धर्मस्य मर्यादां न जानाति सः वृक्षादिभ्यः अपि नीचः अधमः।[xxviii]एतावद् आवश्यकं यत् धर्मः कदाचित् सकामः न भवेत्। सकाम धर्मः स्वकीयं तु अहितुं कारयति अन्येषामपि। तेन स्वस्य अन्यस्य वा कस्यापि प्रयोजनं न सिद्धयति। अपितु सः धर्मः नास्ति अधर्मः एव।[xxix]

श्रीमद्भागवते धर्मस्य सामान्यः, असाधारणः, विशिष्टः, आपदः एतानि चत्वारि रूपाणि वर्णितानि सन्ति। अत्र वयं श्रीमद्भागवते वर्णितौ–विशिष्टापदौ धर्मौ एव व्याख्यास्यामः।

**श्रीमद्भागवतपुराणे वर्णितः विशिष्टः धर्मः**–

श्रीमद्भागवते विशिष्टधर्मस्य अन्तर्गताः– चत्वारः वर्णाः, चत्वारः आश्रमाः तथा राजधर्मप्रतिपादनादयः विषयाः। चतुर्णां वर्णानां धर्मविवेचनंकरोति एवं भागवतकारः –

अध्ययनम् अध्यापनं यजनं याजनं तथा।

दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्।।

अध्ययनम्, अध्यापनं, दानं, प्रतिदानं, यजनं, याजनम् एतेषु रूपेषु ब्राह्मणानां धर्मवर्णनं करोति। क्षत्रियः दानं न नयेत्। प्रजारक्षकाणां क्षत्रियाणां जीवननिर्वाहः ब्राह्मणान् विहाय सर्वेभ्यः यथायोग्यं करं नीत्वा अथवा दण्डादिभ्यः भवति।[xxx]
वैश्याः सदा ब्राह्मणवंशिनां अनुयायिनः भूत्वा गोपालनकृषिव्यापारादिभ्यः स्वीयां जीविकां चालयेयुः।[xxxi] शूद्राणां धर्मः यत् ते द्विजादिनां सेवां कुर्युः। तेषां जीविकायाः निर्वाहः तस्य स्वामी करोति।[xxxii]एतद्वर्गीयाः मनुष्याः उत्तमवर्णवृत्तीनाम् अवलम्बनम् आपत्तिकाले एव कुर्युः।[xxxiii]

भागवतकारेण जीवनस्य उच्चतमलक्ष्यस्य मोक्षप्राप्तेः मूलसाधनभूतानाम् आश्रमाणां धर्मविवेचनमपि प्रस्तुतम्। प्रथमः आश्रमः ब्रह्मचर्याश्रमः। अस्य आश्रमस्य महत्त्वं ज्ञापयन् भागवतकारः कथयति गुरुकुलेनिवसन् ब्रह्मचारी स्वेन्द्रियाणि वशे कृत्वा दासवत् स्वात्मानं कनिष्ठः मन्यमानः गुरोः हितकार्यं कुर्यात्। सः प्रातः सायं गुरुं सूर्यं श्रेष्ठान् देवान् च उपासेत। वेदानां स्वाध्यायः अत्यावश्यकः। शास्त्रानुसारं मेखलाम्,अजिनचर्म, जटां,दण्डं, कमण्डलुं, यज्ञोपवीतं, तथा कुशां धारयन् भिक्षाटनं कृत्वा गुरोः आज्ञानुसारं भोजनं कुर्यात्।[xxxiv]

गृहस्थाश्रमस्य विशिष्टधर्मं प्रतिपादयन् श्रीमद्भागवते उक्तम्– मनुष्यः गृहस्थाश्रमे वसन् गृहस्थधर्मानुसारं सर्वाणि कार्याणि कृत्वा भगवते समर्पयेत्। [xxxv]गृहस्थः सत्संगादिभिः बुद्धिशुद्धिं कृत्वा शरीरस्य स्त्रियः पुत्रस्य धनादीनाम् आसक्तिं विहाय विरक्तः भवेत्। पित्रोः गुरुजनानां च आज्ञा मन्तव्या, साधुसेवादीनि कार्याणि कर्त्तव्यानि।[xxxvi]गृहस्थैः धर्मार्थकामानां कृते अधिकं कष्टं न सोढव्यम् अपितु यावत् प्राप्यते तावता एव संतोषःकर्त्तव्यः।[xxxvii]

वानप्रस्थाश्रमस्य विशिष्टान् धर्मान् वर्णयन् भागवतकारः कथयति– वानप्रस्थी पर्णकुट्यां निवसन् शिरसि जटां धारयन्, वल्कलवस्त्रैः अग्निहोत्रस्य च सम्पूर्णाभिः सामग्रीभिःसह स निवसेत्।[xxxviii] वानप्रस्थी यदा वार्द्धक्येन स्वकर्मकरणे अशक्तः भवेत्, वेदान्तविचारशक्तिरहितः भवेत् तदा सः अनश्नन् आत्मनि अग्निं निवेशयेत्। सः शरीरस्य आकाशम् आकाशे, प्राणान् वायौ, अग्निं अग्नौ, रक्तकफादिकं जले, अस्थ्यादिपार्थिव–गुणयुक्तानि वस्तूनि पृथिव्यां, वाणी वा तस्याः कर्म भाषणदिकं तस्याः अधिष्ठात्रीदेवतायाम् अर्थात् अग्नौ मूत्रं मलोत्सर्गादिकं च मृत्यौ निवेशयेत्।[xxxix] "वानप्रस्थी 'अविनाशिनी ईश्वररूपे विशिष्टं यत् चित्तवस्तुस आत्मा सोऽहम्' इति कृत्वा स्थिरः भवेत्[xl] यथा अग्निःस्वाश्रयेषुवृक्षादिषु भस्मसु सत्सु शान्तः भूत्वा स्वरूपे स्थिरः भवति।

संन्यासिनः विशिष्टधर्मस्यापि श्रीमद्द्भागवते विवेचनमास्ति। श्रीमद्द्भागवते उक्तम् यत् यदि वानप्रस्थी ब्रह्मविचारे समर्थः चेत् शरीरं विहाय सर्वं त्यजेत् संन्यासं च धारयेत्।संन्यासिना व्यक्तिवस्तुस्थानसमयादिकम् उपेक्ष्य एकस्मिन् ग्रामे एकरात्रि–आवाससंकल्पः ग्राह्यः सम्पूर्णायां च पृथिव्यां भ्रमितव्यम्। सः केवलं गुप्ताङ्गाच्छाद्यानि वस्त्राणि एव धारयेत्।[xli]संन्यासी सर्वप्राणिषु शान्तः स्थित्वा भगवत्पारायणे निरतः स्यात्। सः अनाश्रितः भूत्वा स्वाश्रये वसेत् एकाकी च विचरेत्। एतं विश्वं कार्यकारणरहिते परमात्मनि अव्यक्तं मत्वा कार्यकारणरूपे अस्मिन् जगति ब्रह्मस्वरूपं स्वात्मानं परिपूर्णं द्रष्टव्यम्।[xlii]भागवतानुसारं आत्मदर्शी संन्यासी सुषुप्तिजागरणयोः सन्धौस्वस्वरूपस्य दर्शनं कुर्यात्। बन्धनमौक्षौ द्वावपि माया

एव अस्ति वास्तविकतायां किमपि नास्ति एतदेव ज्ञातव्यम्। तेन सर्वेषां प्राणिनां उत्पत्तिविनाशयोः कारणीभूतस्य कालस्य प्रतीक्षां कुर्वता असतः अनात्मवस्तुनःपरित्यागंबोधयितृषु शास्त्रेषु अनुग्रहभावम् अनुभवन् पक्षपातरहितेन भाव्यम्।[xliii]

**श्रीमद्भागवतपुराणे प्रतिपादितः आपद्धर्मः**:-

श्रीमद्भागवते प्रतिपादितस्य धर्मस्य चतुर्थं रूपम् आपद्धर्मः। आपद्धर्मान्तर्गतंकर्म- यदा धर्मनियमाः न परिपाल्यन्ते अपितु तान् विहाय प्राणरक्षा क्रियते सः व्यवहारः आपद्धर्मः। उदाहरणरूपेण- यदा ब्राह्मणस्य कृते स्वधर्मानुकूला आजीविका असम्भवा भवति तदा सः वैश्यवृत्या वा क्षत्रियवृत्या जीविकां चालयेत्। यदि ते अपि असम्भवे चेत् सः कयापि वृत्याआजीविकां चालयेत्। मनुस्मृतौ अपि मनुना आपद्धर्मः विवेचितः।[xliv]

धर्मस्य विपरीतस्य, अधर्मस्यापि श्रीमद्भागवते पञ्चशाखाः प्रोक्ताः।पञ्चशाखाः-विधर्मः, परधर्मः, आभासः, उपमा, छलश्च।[xlv] यत् कार्यं धर्मबुद्ध्या कृत्वा अपि स्वधर्मे बाधां कुर्यात् सः विधर्मः।कस्यचिद् अन्यस्य कृते अन्येन पुरुषेण उपदिष्टः धर्मः परधर्मः। पाखण्डस्य दम्भस्य वाउपधर्मस्य उपमा वा अस्ति। शास्त्रवचनानां अन्यप्रकारस्य अर्थः छलः। स्वाश्रयाद् भिन्नं स्वेच्छया मन्यमानः धर्मः आभासः।[xlvi]

भागवतकारानुसारम्- संकल्पानां त्यागेन कामम्, कामनानां त्यागेन क्रोधं, लौकिकाः यं अर्थः इति जानन्ति तम् अनर्थम् इत्येवं मत्वा लोभम्तत्त्वविचारेण च भयं जयेत्।[xlvii] अध्यात्मविद्यया मोहम्, सतां सत्सङ्गेन उपासनया च दम्भम्, मौनेन योगविघ्नान्, शरीरं निश्चेष्टं कृत्वा हिंसां जयतु।[xlviii]आधिभौतिकं दुःखं दयया, आधिदैविकां वेदनां समाधिना, आध्यात्मिकं दुःखं योगवलयेन तथा निद्रां सात्त्विकभोजनेनस्नानेन तथा सत्सङ्गादिना जयतु।[xlix]

सत्त्वगुणेन रजोगुणतमोगुणौ तथा उपरतिना सत्त्वगुणं जयतु।[l]भागवतकारानुसारम् शास्त्रेषु यावन्तः अपि नियमसम्बन्धिनः आदेशाः सन्ति तेषाम् एकमात्रं तात्पर्यम् एतद् एव यत् कामक्रोधलोभमोहमदमत्सरान् एतान् षट् शत्रून् जित्वा पञ्चेन्द्रियाणि मनः च नियमितव्यम्।[li]

इत्थम् उपर्युक्तेन विवेचनेन स्पष्टं भवति यत् श्रीमद्भागवतः धर्मस्य लक्षणं तत्स्वरूपं तस्य च विविधानां भेदानां सर्वाङ्गीणतया विवेचकः सम्पूर्णसंस्कृतसाहित्ये अद्वितीयं ग्रन्थरत्नं अस्ति। श्रीकृष्णवेदव्यासेन भक्तिप्रतिष्ठा तु विवेचिता सार्धमेव त्रिवर्गस्य प्रमुखतमाङ्गस्य धर्मस्य विशिष्टं विवेचनं कृतं येन एतत् पुस्तकं धर्मग्रन्थ इति रूपेण लोके विलसति तथा धर्मं सर्वोपरि मत्वासः कथयति यत् यः मनुष्यः धर्मं न पालयिष्यति तस्य अमङ्गलम् एव भविष्यति।[lii] पुनश्च यःभारतीयज्ञानपरम्परायाम्[liii] निर्दिष्टं भागवतानुसारं धर्मस्य पालनं करिष्यति सः इहलोके परलोके च आनन्दमयः भवति।।[liv]

**विशेषानुशीलितग्रन्थसूची –**


1. ऋग्वेदसंहिता , परोपकारिणी सभा,अजमेर,1987 ई0
2. यजुर्वेदसंहिता, परोपकारिणी सभा,अजमेर,1987 ई0
3. सामवेदसंहिता, परोपकारिणी सभा,अजमेर,1987 ई0
4. अथर्ववेदसंहिता,परोपकारिणी सभा अजमेर 1987 ई
5. ऋग्वेद-भाषा-भाष्यम्, स्वामी दयानन्द सरस्वती, दयानन्द संस्थान, नई दिल्ली, 1973 ई
6. ऋग्वेद-भाषा-भाष्यम्, श्री आचार्य वैद्यनाथ शास्त्री, सार्वदेशिक आर्य प्रतिनिधि सभा, दिल्ली,1973

7. यजुर्वेद-भाषा-भाष्यम्, स्वामी दयानन्द सरस्वती, सार्वदेशिक आर्य प्रतिनिधि सभा, दिल्ली, 1973
8. चतुर्वेद भाषा-सुबोध-भाष्यम्, श्रीपाद दामोदर सातवलेकर, स्वाध्याय मण्डल, पारडी-1950 ई
9. चतुर्वेद-भाष्यम्, श्रीमत्सायणाचार्य, वैदिक संशोधन मण्डल, पुणे, 1936 ई
10. निरुक्त-वेदार्थदीपक-भाष्य, श्री चन्द्रमणि विद्यालंकारकृत , आर्यप्रकाशन, झज्जर, हरियाणा, 1985
11. निरुक्तम्(ऋषियास्क विरचितम्), (टी.), प.छज्जूरामशास्त्री विद्यासागरः, पु.मु.1987,मोहनचन्द लक्ष्मणदास पब्लिकेशन्स,
12. नई दिल्ली,भारत संस्कृत-हिन्दी-कोष- श्रीवामनशिवराम-आप्टे, मोतीलाल बनारसीदास पब्लिशर्स प्रा.लि. दिल्ली, सन् 1989
13. शब्दार्थ-कौस्तुभः, द्वारिकाप्रसाद शर्मा चतुर्वेदी, रामनारायणलाल बेनीप्रसाद, इलाहाबाद, सन् 1989
14. मनुस्मृतिः(मनु विरचित), (स.)श्रीगोपालशास्त्री नेने, ़ैफ्रवि, चौखम्बा संस्कृत संस्थान,गोपाल मन्दिर लेन, वाराणसी , उ. प्र.,भारत
15. तैत्तिरीयारण्यकम् (भट्टभास्करभाष्यसहितम्), गवर्मेन्ट ब्रान्च प्रेस, मैसूर - सन्1900,
(https://archive.org/details/taittiriya/taittiriyaaranyakabhaskara01/mode/2up?view=theater)
16. मीमांसादर्शन, (शाबरभाष्यसहितम्) प्रकाशकः - चौखम्बा सुरभारती प्रकाशनम् वाराणसी।
17. अर्थसंग्रहः, मीमांसार्थसंग्रहकौमुदी-टीकासहितम्, चौखम्बा संस्कृत सीरिज ऑफिस ,वाराणसी
18. वैशेषिक दर्शन, भाष्यकार - आचार्य उदयवीर शास्त्री, प्रकाशकः - विजयकुमार गोविन्दराम हासानन्द, दिल्ली
19. महाभारतम्, 2045वि,गीताप्रेस, गोरखपुर, उ. प्र.,भारत
20. हितोपदेश, प.रामेश्वर भट्ट, , *चौखम्बा संस्कृत संस्थान,* दिल्ली
21. पद्मपुराणम्, प. पन्नालाल जैन, भारतीय ज्ञान पीठ, काशी
22. देवीभागवत पुराण, गीताप्रेस, गोरखपुर, उ. प्र.,भारत
23. चाणक्यनीतिः, स्वामी जगदीश्वरानन्द सरस्वती, प्रकाशकः - विजयकुमार गोविन्दराम हासानन्द, दिल्ली
24. श्रीमद्भागवतपुराण, गीताप्रेस, गोरखपुर, उ. प्र.,भारत

.

---

ii.मनुस्मृतिः - 2/6

iii.यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
तेह नाकं महिमानः सचन्त यत्र पूर्वेसाध्याः सन्ति देवाः।। ऋग्वेदः - 1/64/50

iv.ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च।
भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले।। अथर्ववेदः - 11/7/17

v.तैत्तिरीयारण्यकम् - 10-63-7
vi.मीमांसादर्शनम् - 1-1-2
vii.मीमांसादर्शनम् - 1-1-2
viii.अर्थसंग्रह:- लक्षणपरिच्छेद:
ix.यागादिरेव धर्म:। तल्लक्षणं वेदप्रतिपाद्य: प्रयोजनवदर्थो धर्म:। अर्थसंग्रह:- लक्षणपरिच्छेद:
x.वैशेषिकदर्शनम् -1/2
xi.मनुस्मृति: - 6/92
xii.मनुस्मृति: - 8-17
xiii.आचार: प्रथमो धर्म: श्रुत्युक्त: स्मार्त एव च।
तस्मादस्मिन्समायुक्तो नित्यं स्यादात्मनो द्विज:।। मनुस्मृति: - 1-55
xiv.धारणाद् धर्म इत्याहुर्धर्मों धारयते प्रजा:।
य: स्याद् धारणसंयुक्त: स धर्म इति निश्चय:।। महाभारतम् (क) वनपर्व- 72-58, (ख) शान्तिपर्व - 109-11
xv.श्रूयतां धर्म सर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मन: प्रतिकूलानि परेषां न समाचरेत्।।
यद्यदात्मनि चेच्छेत् तत्परस्यापि चिन्तयेत्।
आत्मन: प्रतिकूलानि परेषां न समाचरेत्।।पद्मपुराणम्, सृष्टिपर्व - 19/357-358 (हे मानवा:! स्वजीवने भवन्त: यान् गुणान् नेच्छन्ति,
तान् गुणान् परेभ्य: नाचरणीया: । यतो हि सर्वे जना: आत्मीया: एव । सर्वे एव मानवा: परमात्मन: एव पुत्रा: सन्ति । अत: ते सर्वे एव
बान्धवा: सन्ति । बान्धवै: न प्रतिकूलानि नाचरणीयानि)
xvi.देवीभागवतपुराणम् - 11-1-7
xvii.चला लक्ष्मीश्चला: प्राणश्चलेजीवितयौवने।
चलाचलेति संसारेधर्म एकोहि निश्चल:।। चाणक्यनीति:- 5/20
xviii.आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीना: पशुभि: समाना:।। हितोपदेश: - 1/25
xix.सत्यं दया तप: शौचं तितिक्षेक्षा शमो दम:।
अहिंसा ब्रह्मचर्यं च त्याग: स्वाध्याय: आर्जवम्।।
सन्तोष: समदृक्सेवा ग्राम्येहापरम: शनै:।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्।।
अन्नाद्यादे: संविभागो भतेभ्यश्च यथार्हत:।
तेष्वात्मदेवताबुद्धि: सुतरां नृषु पाण्डव।।

श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः।
सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम्।।
नृणामयं परो धर्मः सर्वेषां समुदाहृतः।
त्रिंशल्लक्षणवान्राजन्सर्वात्मा सेन तुष्यति।।श्रीमद्भागवतपुराणम्7/11/8-12
xx.श्रीमद्भागवतपुराणम्6/1/40
xxi.श्रीमद्भागवतपुराणम्6/1/45
xxii.श्रीमद्भागवतपुराणम्1/2/6
xxiii.श्रीमद्भागवतपुराणम्7/11/7
xxiv.धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्।।श्रीमद्भागवतपुराणम्1/2/8
xxv.स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषितम्।। श्रीमद्भागवतपुराणम्1/2/13
तस्मादेकेन मनसा भगवान्सात्वतां पतिः।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूजयश्च नित्यदा।। श्रीमद्भागवतपुराणम्1/2/14
xxvi.धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते।
नार्थस्य धर्मेकान्तस्य कामो लाभाय हि स्मृतः।।श्रीमद्भागवतपुराणम्1/2/
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता।
जीवस्य तत्व जिज्ञासा नार्थो यश्चेह कर्मभिः।।श्रीमद्भागवतपुराणम्1/2/10
xxvii.श्रीमद्भागवतपुराणम्6/3/5
xxviii.श्रीमद्भागवतपुराणम्6/3/19
xxix.श्रीमद्भागवतपुराणम्6/10/8
xxx.श्रीमद्भागवतपुराणम्7/11/13-14
xxxi.श्रीमद्भागवतपुराणम्7/11/15
xxxii.श्रीमद्भागवतपुराणम् 7/11/15
xxxiii.श्रीमद्भागवतपुराणम् 7/11/17
xxxiv.श्रीमद्भागवतपुराणम्7/12/1-5
xxxv.श्रीमद्भागवतपुराणम्7/12/10
xxxvi.श्रीमद्भागवतपुराणम्7/14/2-4
xxxvii.श्रीमद्भागवतपुराणम्7/14/7
xxxviii.श्रीमद्भागवतपुराणम् 7/12/17-21
xxxix.श्रीमद्भागवतपुराणम् 7/12/23-28
xl.श्रीमद्भागवतपुराणम् 7/12/29-31
xli.श्रीमद्भागवतपुराणम् 7/13/1-2

xlii.एक एव चरेद् भिक्षुरात्मरामोऽनपाश्रयः।
सर्वभूतसहृच्छान्तो नारायणपरायणः।। श्रीमद्भागवतपुराणम्7/13/3-4
xliii.श्रीमद्भागवतपुराणम् 7/13/5-10
xliv.मनुस्मृतिः 10/81-82
xlv.श्रीमद्भागवतपुराणम् 7/15/12
xlvi.श्रीमद्भागवतपुराणम् 7/15/13-14
xlvii.श्रीमद्भागवतपुराणम्7/15/22
xlviii.श्रीमद्भागवतपुराणम्7/15/23
xlix.श्रीमद्भागवतपुराणम् 7/15/24
l.श्रीमद्भागवतपुराणम्7/15/25
li.श्रीमद्भागवतपुराणम्7/15/28
lii.श्रीमद्भागवतपुराणम्7/15/46
liii.मनुस्मृतिः -8/15
liv.श्रीमद्भागवतपुराणम्7/15/45